# जया जया वीवे राघवेन्द्र

जया जया वीवे राघवेन्द्र

भव भाया नशाका राघवेंद्र

थुंगा थेराडी राघवेंद्र

मंगल महिमाने राघवेंद्र

अंग रहितारिगे राघवेंद्र

थिमनन्ना सुथा राघवेंद्र

कंगल्लीलादावरिगे राघवेंद्र

भोमा मारुति प्रिय राघवेंद्र

वेंकट नमक राघवेंद्र

संकटा हरका राघवेंद्र ||10||

वीणा पंडिता राघवेंद्र

गण विशारद राघवेंद्र

सरस्वती पाठी राघवेंद्र

सरस्वती विद्या राघवेंद्र

कुंभा कोना वासा राघवेंद्र

सुधीद्र शिष्य राघवेंद्र

परिमाला पंडिता राघवेंद्र

भाष्यकारा गुरु राघवेंद्र

शिष्य विद्या राघवेंद्र
अयासादिम बरे राघवेंद्र ||20||

गंधव थेयने राघवेंद्र
अग्नि सुक्तादिम राघवेंद्र
विप्ररु लीपिसे राघवेंद्र
क्षिप्रदी मयूरी राघवेंद्र
शरणु होगलु राघवेंद्र
वरुण सुक्तादिम राघवेंद्र
चंदना वायथु राघवेंद्र
सुथानिगे मुंजियु राघवेंद्र
संन्यासी अगालु राघवेंद्र
शरदगेन्यू राघवेंद्र||30||

आश्रम धारिसिदा राघवेंद्र
पिशागी यगे सती राघवेंद्र
मोक्षवा गयसिदा राघवेंद्र
चथु शास्ति कलेयिंदा राघवेंद्र
अथुला प्रकाशानु राघवेंद्र
मोडलिना गुरुगलु राघवेंद्र
यादवेंद्ररु राघवेंद्र

अधिकार नम्मादु राघवेंद्र

अधिक थोंडारे कोडे राघवेंद्र

हरिया स्मरिसालु राघवेंद्र ||40||

परिहार वायथु राघवेंद्र

बड़ा वेंकनगे राघवेंद्र

वडेयाना दयायंदा राघवेंद्र

दिवाना गिरी बारे राघवेंद्र

दिवाना डोरेगले राघवेंद्र

मुसलमानना डोरे राघवेंद्र

ठतेली भोजन राघवेंद्र

बट्टेयु मुचिरे राघवेंद्र

तीर्थवा प्रोक्षीशे राघवेंद्र

थातेली फला पुष्पा राघवेंद्र ||50||

वंदिसिदानु डोरे राघवेंद्र

मान्यागलानु कोडे राघवेंद्र

दोरेया नेनापिगे राघवेंद्र

गोपुरा विरिसिडा राघवेंद्र

वेंकन्नगे पेले

राघवेंद्र माधवराडी

राघवेंद्र केरे येरिया मेले राघवेंद्र
करिया शिलेयोलु राघवेंद्र
बृंदावन मादे राघवेंद्र
उलिदा शिलेयोलु राघवेंद्र ||60||

मारुथियानु मादि राघवेंद्र
कीरुथी पदेडारु राघवेंद्र
उथमा दिनोदोलु राघवेंद्र
शिश्यारिगेलुथा राघवेंद्र
दक्षिण द्वारादि राघवेंद्र
आ क्षणा होकरु राघवेंद्र
ओन्दु दीना श्रीगलु राघवेंद्र
मदुवेगे शिष्य केले राघवेंद्र
मृतिके कोडालगी राघवेंद्र ||70||

द्विजहगे झगुलियोलागे राघवेंद्र
भ्रम फिशाचियु राघवेंद्र
मृतिके भाराडिंडा राघवेंद्र
सुत्तु भुदियागे राघवेंद्र
शिशयाना मदुवेयु राघवेंद्र
रत्न हारा भाराडिंडा राघवेंद्र

अग्नि योलित्तरु राघवेंद्र
हारा बेकेनलु राघवेंद्र
कुंडदी थेगेदारु राघवेंद्र
निरिनावनु केले राघवेंद्र ||80||

मोक्ष बेकेनालु राघवेंद्र
मुक्तिया निथारू राघवेंद्र
देसायी ओन्दु दीना राघवेंद्र
गुरुगाला करेसालु राघवेंद्र
माविना रसदोलु राघवेंद्र
अदुवा मोगु बीले राघवेंद्र मागु
मृत्यु होंडालु राघवेंद्र
आंडु व्याथिसिडरु राघवेंद्र
रमण दयायिंदा राघवेंद्र
जीवन विथारू राघवेंद्र ||90||

परिजाना हरुषादि राघवेंद्र
थारलाना करेदारु राघवेंद्र
गुरुगली करुनिसी राघवेंद्र
प्रणव निथारू राघवेंद्र
वानाके चिगुरिसी राघवेंद्र

विप्रारिगे सिरीबंथु राघवेंद्र

शिशय मगनोब्बा राघवेंद्र

बिसिलाली बालालौ राघवेंद्र

शताली नेरालानु राघवेंद्र

इच्छा भोजन राघवेंद्र ||100||

जथका बरेयालु राघवेंद्र

ओन्दु नूरू मनुजंगे राघवेंद्र

मुरु नूरू ग्रंथके राघवेंद्र

बृंदावना केलुनूरू राघवेंद्र

परी परी रोगहारा राघवेंद्र

जया जया मंगला राघवेंद्र

जया जया विट्ठलदास राघवेंद्र

निथ्या नादादोलु राघवेंद्र ||108||

## श्री राघवेन्द्र स्तोत्रम्

श्रीपूर्णबोधगुरुतीर्थपयोब्धिपारा

कामारिमाक्षविषमाक्षशिरः स्पृशन्ती ।

पूर्वोत्तरामिततरङ्गचरत्सुहंसा

देवालिसेवितपराङ्घ्रिपयोजलग्ना ॥ १ ॥

जीवेशभेदगुणपूर्तिजगत्सुसत्त्व
नीचोच्चभावमुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैः गुरुराघवेन्द्र
वाग्देवतासरिदमुं विमली करोतु ॥ २ ॥

श्रीराघवेन्द्रः सकलप्रदाता
स्वपादकञ्जद्वयभक्तिमद्भ्यः ।
अघाद्रिसम्भेदनदृष्टिवज्रः
क्षमासुरेन्द्रोऽवतु मां सदाऽयम् ॥ ३ ॥

श्रीराघवेन्द्रो हरिपादकञ्ज-
निषेवणाल्लब्धसमस्तसम्पत् ।
देवस्वभावो दिविजद्रुमोऽयम्
इष्टप्रदो मे सततं स भूयात् ॥ ४ ॥

भव्यस्वरूपो भवदुःखतूल-
सङ्घाग्निचर्यः सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो
दुरत्ययोपप्लवसिन्धुसेतुः ॥ ५ ॥

निरस्तदोषो निरवद्यवेषः
प्रत्यर्थिमूकत्त्वनिदानभाषः ।

विद्वत्परिज्ञेयमहाविशेषो
वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥

सन्तानसम्पत्परिशुद्धभक्ति-
विज्ञानवाग्देहसुपाटवादीन् ।
दत्त्वा शरीरोत्थसमस्तदोषान्
हत्त्वा स नोऽव्याद्गुरुराघवेन्द्रः ॥ ७ ॥

यत्पादोदकसञ्चयः सुरनदीमुख्यापगासादिता-
सङ्ख्याऽनुत्तमपुण्यसङ्घविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महा वन्ध्यासुपुत्रप्रदो
व्यङ्गस्वङ्गसमृद्धिदो ग्रहमहापापापहस्तं श्रये ॥ ८ ॥

यत्पादकञ्जरजसा परिभूषिताङ्गा
यत्पादपद्मधुपायितमानसा ये ।
यत्पादपद्मपरिकीर्तनजीर्णवाच
स्तद्दर्शनं दुरितकाननदावभूतम् ॥ ९ ॥

सर्वतन्त्रस्वतन्त्रोऽसौ श्रीमध्वमतवर्धनः ।
विजयीन्द्रकराब्जोत्थसुधीन्द्रवरपुत्रकः ।
श्रीराघवेन्द्रो यतिराट् गुरुर्मे स्याद्भयापहः ।
ज्ञानभक्तिसुपुत्रायुः यशः श्रीः पुण्यवर्धनः ॥ १० ॥

प्रतिवादिजयस्वान्तभेदचिह्नादरो गुरुः ।
सर्वविद्याप्रवीणोऽन्यो राघवेन्द्रान्नविद्यते ॥ ११ ॥

अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ।
अपेक्षितप्रदाताऽन्यो राघवेन्द्रान्नविद्यते ॥ १२ ॥

दयादाक्षिण्यवैराग्यवाक्पाटवमुखाङ्कितः ।
शापानुग्रहशक्तोऽन्यो राघवेन्द्रान्नविद्यते ॥ १३ ॥

अज्ञानविस्मृतिभ्रान्तिसंशयाऽपस्मृतिक्षयाः ।
तन्द्राकम्पवचःकौण्ठ्यमुखा ये चेन्द्रियोद्भवाः ।
दोषास्ते नाशमायान्ति राघवेन्द्र प्रसादतः ॥ १४ ॥

ओं श्रीराघवेन्द्राय नमः इत्यऽष्टाक्षरमन्त्रतः ।
जपिताद्भावितान्नित्यं इष्टार्थाः स्युर्नसंशयः ॥ १५ ॥

हन्तु नः कायजान्दोषानात्मात्मीयसमुद्भवान् ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित् ॥ १६ ॥

इति कालत्रये नित्यं प्रार्थनां यः करोति सः ।
इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ॥ १७ ॥

अगम्यमहिमा लोके राघवेन्द्रो महायशाः ।
श्रीमध्वमतदुग्धाब्धिचन्द्रोऽवतु सदाऽनघः ॥ १८ ॥

सर्वयात्राफलावाप्त्यै यथाशक्तिप्रदक्षिणम् ।
करोमि तव सिद्धस्य बृन्दावनगतं जलम् ।
शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ॥ १९ ॥

सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहम् ।
तव सङ्कीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ॥ २० ॥

संसारेऽक्षयसागरे प्रकृतितोऽगाधे सदा दुस्तरे ।
सर्वावद्यजलग्रहैरनुपमैः कामादिभङ्गाकुले ।
नानाविभ्रमदुर्भ्रमेऽमितभयस्तोमादिफेनोत्कटे ।
दुःखोत्कृष्टविषे समुद्धर गुरो मा मग्नरूपं सदा ॥ २१ ॥

राघवेन्द्र गुरु स्तोत्रम् यः पठेद्भक्तिपूर्वकम् ।
तस्य कुष्ठादिरोगाणां निवृत्तिस्त्वरया भवेत् ॥ २२ ॥

अन्धोऽपि दिव्यदृष्टिः स्यादेडमूकोऽपि वाक्पतिः ।
पूर्णायुः पूर्णसम्पत्तिः स्तोत्रस्याऽस्य जपाद्भवेत् ॥ २३ ॥

यः पिबेज्जलमेतेन स्तोत्रेणैवाभिमन्त्रितम् ।
तस्य कुक्षिगता दोषाः सर्वे नश्यन्ति तत् क्षणात् ॥ २४ ॥

यद्वृन्दावनमासाद्य पङ्गुः खञ्जोऽपि वा जनः ।
स्तोत्रेणानेन यः कुर्यात्प्रदक्षिणनमस्कृति ।
स जङ्घालो भवेदेव गुरुराजप्रसादतः ॥ २५ ॥

सोमसूर्योपरागे च पुष्यार्कादिसमागमे ।
योऽनुत्तममिदं स्तोत्रमष्टोत्तरशतं जपेत् ।
भूतप्रेतपिशाचादिपीडा तस्य न जायते ॥ २६ ॥

एतत्स्तोत्रम् समुच्चार्य गुरोर्वृन्दावनान्तिके ।
दीपसम्योजनाज्ञानं पुत्रलाभो भवेद्ध्रुवम् ॥ २७ ॥

परवादिजयो दिव्यज्ञानभक्त्यादिवर्धनम् ।
सर्वाभीष्टप्रवृद्धिस्स्यान्नात्र कार्या विचारणा ॥ २८ ॥

राजचोरमहाव्याघ्रसर्पनक्रादिपीडनम् ।
न जायतेऽस्य स्तोत्रस्य प्रभावान्नात्र संशयः ॥ २९ ॥

यो भक्त्या गुरुराघवेन्द्रचरणद्वन्द्वं स्मरन् यः पठेत् ।
स्तोत्रम् दिव्यमिदं सदा न हि भवेत्तस्यासुखं किञ्चन ।
किं त्विष्टार्थसमृद्धिरेव कमलानाथप्रसादोदयात् ।
कीर्तिर्दिग्विदिता विभूतिरतुला साक्षी हयास्योऽत्र हि ॥ ३० ॥

इति श्री राघवेन्द्रार्य गुरुराजप्रसादतः ।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्ह्यप्पणाभिदैः ॥ ३१ ॥

पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ ३२ ॥

आपादमौलिपर्यन्तं गुरुणामाकृतिं स्मरेत् ।
तेन विघ्नः प्रणश्यन्ति सिद्ध्यन्ति च मनोरथाः ॥ ३३ ॥

दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे ।
श्रीराघवेन्द्र गुरवे नमोऽत्यन्त दयालवे ॥ ३४ ॥

मूकोऽपि यत्प्रसादेन मुकुन्दशयनाय ते ।
राजराजायते रिक्तो राघवेन्द्रं तमाश्रये ॥

इति श्री अप्पण्णाचार्यविरचितं श्रीराघवेन्द्र स्तोत्रम् सम्पूर्णम् ॥

## अथ श्रीराघवेन्द्रसहस्रनामावलिः ।।

ॐ अज्ञानभञ्जनाय नमः । अणिमाद्यष्टसिद्धिदाय । अनणुज्ञानसम्पदे ।

अमोघशक्तये । अनघाय । अपरोक्षीकृताच्युताय ।

अखिलाभीष्टदाय । आत्मविदे । आयुःप्रवर्धनाय ।

आनन्दतीर्थसच्छास्त्रटीकाभावप्रकाशकाय । आनन्दसान्द्राय ।

आरब्धकार्यान्तगमनक्षमाय । आकुलीकृतदुर्वादिवृन्दाय ।

आकारबन्धुराय । आशुप्रसन्नाय । आसन्नभक्तकामसुरद्रुमाय ।

आध्यात्मरताय । आचार्याय । आसमुद्रैकसद्गुरवे । आत्मारामार्चनासक्ताय नमः । २०

ॐ आर्याय नमः । आप्ततमाय । इन्द्रियोत्पन्नदोषघ्नाय ।

इन्द्रवत्त्यागभोगिने । इष्टदात्रे । ईषणात्रयवर्जिताय ।

उग्ररक्षःपिशाचघ्नाय । उन्मादहराय । उत्तमाय । उदारचित्ताय ।

उद्धारकाय । उत्पातहारकाय । उपेक्षितकुवादीन्द्राय । उपकारपरायणाय ।

ऊरुदघ्नीकृतापारभवसागराय । ऊर्जिताय । ऊष्महर्त्रे ।

ऋक्षाधिपतिशीतलदर्शनाय । ऋजुस्वभावाय । ऋद्धोरुमाहात्म्याय नमः । ४०

ॐ ऋजुमाससाय नमः । एडमूकसुवाग्दात्रे । एकभाषिणे ।

एकान्तभक्ताय । ऐश्वर्यदात्रे । एक्यमतच्छिदे ।

ओतत्वेत्याद्यनुव्याख्यासुधाभावार्थदर्शिने । ओङ्कारजपशीलाय ।

सदा ओमात्मेत्युपासिने । औषधोक्त्यापि भक्तानामामयाधिकहारिणे ।

अंसात्ततुलसीमालाय । अंहोनाशकदर्शनाय । अस्तङ्गतारिषड्वर्गाय ।

अर्थिमन्दारकाय । कलिदोषविनाशाय । कलौ सद्यः

फलप्रदाय । कमलापतिभक्ताय । कुण्ठकुण्ठत्वभञ्जिने ।

करालनरसिंहोग्रक्रोधशामकमूर्तये । कपोलशङ्खचक्रांशशालिने नमः । ६०

ॐ कपटवर्जिताय नमः । कल्पभूरुहरूपाय । कलभौधाभकीर्तये ।

कमण्डलुं धर्त्रे । करे दण्डधराय । कामेषूणामलक्ष्याय ।

कामिनीकामनोज्झिताय । कामारिश्लाघ्यसद्वृत्ताय । कामदाय ।

कामरूपधृते । कानीनभाववेत्त्रे । कालज्ञाय । कालसाधकाय ।

कापालिकमतध्वंसिने । काशिकाकाशमानवाचे । कान्तारभीतिघ्ने ।

कान्तिकान्ताय । कापथवर्जिताय । काषायाम्बरधारिणे ।

काश्मीरद्रवचर्चिताय नमः । ८०

ॐ किरातभीतिसंहर्त्रे नमः । किलासित्वविनाशकाय । कीनाशभयघ्ने ।
कीटभयघ्ने । कीर्तिमण्डिताय । पिशाचानां कुकूलाभाय ।
कुष्ठरोगनिवारणाय । कुशासनस्थिताय । कुक्षिपूरकाय । कुतूहलिने ।
कुत्सिताचाररहिताय । कुमारसुखवर्धनाय । कुशलाय । कुलीनाय ।
कुशासनविवर्जिताय । कुम्भघोणकृतावासाय । कुतोऽपि भयभञ्जनाय ।
कूपपातकपापघ्नाय । कूर्मासनपरिग्रहाय । कूष्माण्डादि प्रतिभयाय नमः । १००

ॐ कीर्तिदाय नमः । कीर्तनप्रियाय । केशवाराधकाय । केतुदोषघ्नाय ।
केवलेष्टदाय । केतकीकुसुमासक्ताय । केसरद्रवलोलुपाय । कैवल्यदात्रे ।
कैङ्कर्यतुष्टश्रीशाय । कोशदाय । कालानुसारदात्रे । कोशिने ।
कोशातकीप्रियाय । कोलाहलविरोधिने । कौपीनपटलाञ्छनाय ।
कम्बुध्वनिप्रियाय । कम्बुग्रीवाय । कम्पविवर्जिताय ।
कृपीटयोनिवर्चस्थाय । कृतभक्तार्तिनाशनाय नमः । १२०

ॐ कृत्यासनाय नमः । कृतज्ञाय । कृत्याचेष्टकभञ्जनाय ।
कृपामहोदधये । कृष्णध्यानासक्ताय । कृशप्रियाय ।
कस्तूरीतिलकासक्ताय । कृत्तसंसारसाध्वसाय । खगेशवाहभक्ताय ।
खरपातकहारिणे । खदोषहर्त्रे । खपुरप्रियाय । खलमारिणे ।
खाद्यप्रियाय । खलपुवे । खिलहीनाय । खेदहन्त्रे ।
खिन्नचित्तप्रमोददाय । खेदघ्ने । खुरणोघ्नाय नमः । १४०

ॐ खञ्जदुःखनिवारणाय नमः । खोडत्वनाशकाय । गरघ्नाय ।

गणनम्याङ्घ्रये । गरुत्मद्वाहसेवकाय । गुरवे । गुणार्णवाय ।

गलात्ततुलसीमालाय । गर्भदाय । गर्भदुःखघ्ने । गर्तहारिणे ।

गजगतये । गतदोषाय । गतिप्रदाय । गदाधराय । गदहराय ।

गर्वघ्ने । गरिमालयाय । गभस्तिमते । गह्वरस्थाय नमः । १६०

ॐ गतभिये नमः । गलिताहिताय । गताघाय । गर्जितारातये ।

गदयित्नवे । गवां प्रियाय । ग्रस्तारये । ग्रहदोषघ्नाय ।

ग्रहोच्चाटनतत्पराय । गीष्पत्याभाय । गायत्रीजापकाय ।

गायनप्रियाय । ग्रामण्ये । ग्राहकाय । ग्राहिने । ग्रावग्रीवमतच्छिदाय ।

ग्रामक्षेमकराय । ग्राम्यभयघ्ने । ग्राहभीतिघ्ने । गात्रक्षेमकराय नमः । १८०

ॐ गामिने नमः । गिरिसारनिभाङ्गकाय । गतभाविजनये । गम्याय ।

गीर्वाणावासमूलभुवे । गुणिने । गुणप्रियाय । गुण्याय । गुहावासाय ।

गुरुप्रियाय । गुडप्रियाय । गुच्छकण्ठाय । गुल्मच्छेत्त्रे । गुणादराय ।

गुप्तगुह्याय । गूढकर्मणे । गुरुराजाय । गूहिताय । गेहदात्रे ।

गेयकीर्तये नमः । २००

ॐ गैरिकारञ्जिताम्बराय नमः । गृह्यक्षेमकराय । गृह्याय ।

गृहगाय । गृहवर्धनाय । गोदावरीस्नानरताय । गोपबालकपूजकाय ।

गोष्पदीकृतसंसारवार्धये । गोपुररक्षकाय । गोप्यमन्त्रजपाय ।

गोमते । गोकर्णिने । गोचराखिलाय । गोग्रासदाय । गोत्ररत्नाय ।

गोस्तनीनिभभाषणाय । गोप्त्रे । गौतमशास्त्रज्ञाय । गौरविने ।

गौरवप्रदाय नमः । २२०

ॐ गन्त्रे नमः । गञ्जितशत्रवे । गन्धर्वाय । गन्धवर्धनाय ।

गन्धिने । गन्धवतीसूनुग्रन्थविदे । गन्धवाहविदे । गन्धर्वाभाय ।

ग्रन्थिभेदिने । ग्रन्थकृते । ग्रन्थपाठकाय । गण्डशैलप्रियाय ।

गण्डमालभिदे । गण्डकीरतये । गङ्गास्नायिने । गाङ्गेयप्रदाय ।

गाण्डीविमित्रविदे । घटनाननुरूपस्याप्यर्थस्य घटकाय । घनाय ।

घर्महर्त्रे नमः । २४०

ॐ घनप्रीतये नमः । घनाघननिभाङ्गभासे ।

घनसारद्रवासिक्तकायाय । घर्घरिकाङ्कनाय ।

घ्राणतर्पणचार्वङ्गाय । घृणावते । घुसृणप्रियाय ।

घृतप्रियाय । घातितारये । घोषयित्नवे । घोषदाय ।

घोण्टाफलास्थिद्वयजपमालाकराम्बुजाय । घोरामयपरीहर्त्रे ।

घण्टापथगतिप्रियाय । घण्टानादप्रियाय । गणद्वाद्यविनोदनाय ।

चक्रशङ्खाङ्कितभुजाय । चमूमदविभञ्जनाय ।

चराचरक्षेमकर्त्रे । चतुराय नमः । २६०

ॐ चरणारुणाय नमः । चतुष्पदीस्तुत्यमानाय ।

चतुर्मुखपितृप्रियाय । चतुस्सागरविख्याताय । चर्मासनसमाधिमते ।

चत्वरस्थाय । चकोराक्षाय । चञ्चलत्वनिवारकाय ।

चतुर्वेदविशेषज्ञाय । चलाचलकृतप्रियाय ।

चतुरङ्गबलध्वंसिने । चतुरोपायशिक्षिताय । चारुरूपाय ।

चारसेव्याय । चामरद्वयशोभिताय । चित्तप्रसादजननाय ।

चित्रभानुप्रभोज्ज्वलाय । चिरजीविने । चित्तहराय । चित्रभाषिणे नमः । २८०

ॐ चितिप्रदाय नमः । चित्रगुप्तभयत्रात्रे । चिरञ्जीजनसेविताय ।

स्वभक्तानां चिन्तामणये । चिन्तितार्थप्रदायकाय । चिन्ताहर्त्रे ।

चित्तवासिने । चीरकौपीनधारिणे । चिपिटत्यागकृते । चुल्लकक्षिदाय ।

चुल्लवर्धनाय । वैष्णवानां चूडामणये । चूर्णीकृतमहाभयाय ।

यशसा चूडालायै । चूतफलास्वादविनोदनाय । चूडप्राग्वादविनोदनाय ।

चूडाकर्मादि कर्तॄणां सन्निधौ सर्वदोषघ्ने । चेष्टकाय ।

चेष्टकध्वंसिने । चैत्रोत्सवमुदम्भराय नमः । ३००

ॐ चोद्यहर्त्रे नमः । चौरनाशिने । चितिमते । चित्तरञ्जनाय ।

चिन्त्याय । चेतनदात्रे । चन्द्रहासाय । चन्द्रकान्ताय । चन्द्राय ।

चण्डीशपूजकाय । चक्षुःप्रीतिकराय । चन्द्रचन्दनद्रवसेवनाय ।

छद्महीनाय । छत्रभोगिने । छलघ्ने । छदलोचनाय । छन्नज्ञानाय ।

छन्नकर्मणे । छविमते । छात्रसेविताय नमः । ३२०

ॐ छात्रप्रियाय नमः । छात्ररक्षिणे । छागयागातिशास्त्रविदे ।
छत्रचामरधात्रे । छत्रचामरशोभिताय । छिद्रहारिणे ।
छिन्नरोगाय । छन्दश्शास्त्रविशारदाय । भवदुःखानां छेदकाय ।
छिन्नसाध्वसाय । जराहर्त्रे । जगत्पूज्याय । जयन्तीव्रततत्पराय ।
जयदाय । जयकर्त्रे । जगत्क्षेमकराय । जयिने । जराहीनाय । जनैः
सेव्याय । जनानन्दकराय नमः । ३४०

ॐ जविने नमः । जनप्रियाय । जघन्यघ्नाय । जपासक्ताय ।
जगद्गुरवे । जरायुबन्धसंहर्त्रे । जलगुल्मनिवारणाय । जाड्यघ्ने ।
जानकीशार्चिने । जाह्नवीजलपावनाय । जातमात्रशिशुक्षेमिने ।
ज्यायसे । जाल्मत्ववर्जिताय । जिष्णवे । जिनमतध्वंसिने । जिगीषवे ।
जिह्मवर्जिताय । जगदुद्धृतये जाताय । जितक्रोधाय । जितेन्द्रियाय नमः । ३६०

ॐ जितारिवर्गाय नमः । जितदुर्वादिने । जितमनोभवाय । जीवातवे ।
जीविकायै । जीवदात्रे । जीमूतवत् स्थिराय । जीवितेशभयत्रात्रे ।
जीर्णज्वरविनाशनाय । जुष्टश्रीनाथपादाब्जाय । जूर्तिबाधविनाशनाय ।
जेत्रे । ज्येष्ठाय । ज्येष्ठवृत्तये । सतां जैवात्रकसमाय ।
ज्योत्स्नानिभयशसे । चम्भहन्त्रे । जम्बूफलप्रियाय ।
झल्लरीवादनप्रीताय । झषकेतोरुपेक्षकाय नमः । ३८०

ॐ झलाप्रियाय नमः । झूणिहन्त्रे । झञ्झावातभयापघ्ने ।
ज्ञानवते । ज्ञानदात्रे । ज्ञानानन्दप्रकाशवते । टिट्टिरीरहिताय ।
टीकातात्पर्यार्थप्रबोधकाय । टङ्कारकरचारित्राय । टङ्काभाय
दुरितशमनाय । टक्प्रत्ययविकारज्ञाय । टीकृतान्यबुधोक्तिकाय ।
डमरुध्वनिकृन्मित्राय । डाकिनीभयभञ्जनाय । डिम्भसौख्यप्रदाय ।
डोलाविहारोत्सवलोलुपाय । ढक्कावाद्यप्रियाय । ढौकमानाय ।
णत्वार्थकोविदाय । तपस्विने नमः । ४००

ॐ तप्तमुद्राङ्काय नमः । तप्तमुद्राङ्कनप्रदाय । तपोधनाश्रयाय ।
तप्ततापहर्त्रे । तपोधनाय । तमोहर्त्रे । त्वरितदाय । तरुणाय ।
तर्कपण्डिताय । त्रासहर्त्रे । तामसघ्ने । ताताय । तापससेविताय ।
तारकाय । त्राणदाय । त्रात्रे । तप्तकाञ्चनसन्निभाय ।
त्रिवर्गफलदाय । तीव्रफलदात्रे । त्रिदोषघ्ने नमः । ४२०

ॐ तिरस्कृतपराय नमः । त्यागिने । त्रिलोकीमान्यसत्तमाय । पिशाचानां
तीक्ष्णरूपाय । तीर्णसंसारसागराय । तुरुष्कसेविताय (तुरुष्कपूजिताय) ।
तुल्यहीनाय । तुरगवाहनाय । तृप्ताय । तृप्तिप्रदाय ।
तृष्णाहर्त्रे । तुङ्गातटाश्रयाय । तूलायितीकृताघौघाय ।
तुष्टिदाय । तुङ्गविग्रहाय । तेजस्विने । तैलविद्वेषिणे । तोकानां
सुखवर्धनाय । तन्द्रीहराय । तण्डुलदाय नमः । ४४०

ॐ तञ्जापुरकृतादराय नमः । स्थलदाय । स्थापकाय । स्थात्रे ।
स्थिराय । स्थूलकलेवराय । स्थेयसे । स्थैर्यप्रदाय । स्थेम्ने ।
स्थौरिणे । स्थण्डिलेशयाय । दशावते । दक्षिणाय । दत्तदृष्टये ।
दाक्षिण्यपूरिताय । दक्षाय । दयालवे । दमवते । द्रवच्चित्ताय ।
दधिप्रियाय नमः । ४६०

ॐ द्रव्यदाय नमः । दर्शनादेव प्रीताय । दलितपातकाय ।
दत्ताभीष्टाय । दस्युहन्त्रे । दान्ताय । दारुणदुःखघ्ने ।
द्वासप्ततिसहस्राणां नाडीनां रूपभेदविदे । दारिद्र्यनाशकाय । दात्रे ।
दासाय । दासप्रमोदकृते । दिवौकःसदृशाय । दिष्टवर्धनाय ।
दिव्यविग्रहाय । दीर्घायुषे । दीर्णदुरिताय । दीनानाथगतिप्रदाय ।
दीर्घायुष्यप्रदाय । दीर्घवर्जिताय नमः । ४८०

ॐ दीप्तमूर्तिमते नमः । दुर्धराय । दुर्लभाय । दुष्टहन्त्रे ।
दुष्कीर्तिभञ्जनाय । दुःस्वप्नदोषघ्ने । दुःखध्वंसिने ।
द्रुमसमाश्रयाय । दूष्यत्यागिने । दूरदर्शिने । दूतानां
सुखवर्धनाय । दृष्टान्तहीनाय । दृष्टार्थाय । दृढाङ्गाय ।
दृप्तदर्पहृते । दृढप्रज्ञाय । दृढभक्तये । दुर्विधानां
धनप्रदाय । देवस्वभावाय । देहीति याचनाशब्दमूलभिदे (देहीति
याचनाशब्दगूढघ्ने) नमः । ५००

ॐ दूनप्रसादकृते नमः । दुःखविनाशिने । दुर्नयोज्झिताय ।
दैत्यारिपूजकाय । दैवशालिने । दैन्यविवर्जिताय । दोषाद्रिकुलिशाय ।
दोष्मते । दोग्ध्रे । दौर्भिक्ष्यदोषघ्ने । दण्डधारिणे । दम्भहीनाय ।
दन्तशूकशयप्रियाय । धनदाय । धनिकाराध्याय । धन्याय ।
धर्मविवर्धनाय । धारकाय । धान्यदाय । धात्रे नमः । ५२०

ॐ धिषणावते नमः । धीराय । धीमते । धीप्रदात्रे । धूतारिष्टाय ।
ध्रुवाश्रयाय । धृतभक्ताभयाय । धृष्टाय । धृतिमते ।
धूतदूषणाय । धूर्तभङ्गकराय । धेनुरूपाय । धैर्यप्रवर्धनाय ।
धूपप्रियाय । धोरणीभृते । धूमकेतुभयापहाय ।
धौवस्त्रपरीधानाय । नलिनाक्षाय । नवग्रहभयच्छिदे ।
नवधाभक्तिभेदज्ञाय नमः । ५४०

ॐ नरेन्द्राय नमः । नरसेविताय । नामस्मरणसन्तुष्टाय ।
नारायणपदाश्रयाय । नाडीस्थैर्यप्रदाय । नानाजातिजन्तुजनार्चिताय ।
नारीदूराय । नायकाय । नागाद्यैश्वर्यदायकाय । निर्वाणदाय ।
निर्मलात्मने । निष्कासितपिशाचकाय । निःश्रेयसकराय । निन्दावर्जिताय ।
निगमार्थविदे । निराकृतकुवादीन्द्राय । निर्जराप्ताय । निरामयाय ।
नियामकाय । नियतिदाय नमः । ५६०

ॐ निग्रहानुग्रहक्षमाय नमः । निष्कृष्टवाक्याय । निर्मुक्तबन्धनाय ।
नित्यसौख्यभुजे । सम्पदां निदानाय । निष्ठानिष्णाताय ।
निर्वृतिप्रदाय । निर्ममाय (निर्मोहाय) । निरहङ्काराय ।
नित्यनीराजनप्रियाय । निजप्रदक्षिणेनैव सर्वयात्राफलप्रदाय ।
नीतिमते । नुतपादाब्जाय । न्यूनपूर्णत्ववर्जिताय । निद्रात्यागिने ।
निस्पृहाय । निद्रादोषनिवारणाय । नूतनांशुकधारिणे ।
नृपपूजितपादुकाय । नृणां सुखप्रदाय नमः । ५८०

ॐ नेत्रे नमः । नेत्रानन्दकराकृतये । नियमिने । नैगमाद्यैः
भक्तिभावेन सेविताय । भक्त्या भजतां नेदिष्ठाय । भक्तभवाम्बुधेः
नौकायै । नन्दात्मजप्रियाय । नाथाय । नन्दनाय । नन्दनद्रुमाय ।
प्रसन्नाय । परितापघ्नाय । प्रसिद्धाय । परतापहृते । प्रथमाय
। प्रतिपन्नार्थाय । प्रसाधितमहातपसे । पराक्रमजितारातये ।
प्रतिमानविवर्जिताय । प्रवराय नमः । ६००

ॐ प्रक्रमज्ञाय नमः । परवादिजयप्रदाय । प्रमुखाय ।
प्रबलाय । प्रज्ञाशालिने । प्रत्यूहनाशकाय । प्रपञ्जसुखदात्रे ।
प्रकृतिस्थाय । प्रवृत्तिकृते । प्रभूतसम्पदे । पत्रोर्णधारिणे ।
प्रणवतत्पराय । प्रचण्डाय । प्रदरध्वंसिने । प्रतिग्रहविवर्जिताय ।
प्रत्यक्षफलदात्रे । प्रसादाभिमुखाय । पराय । पाठकाय ।
पावनाय नमः । ६२०

ॐ पात्रे नमः । प्राणदात्रे । प्रसादकृते । प्राप्तसिद्धये ।
पारिजातदर्पघ्ने । पाकसाधनाय । पाटीरपादुकाय । पार्श्ववर्तिने ।
पारायणप्रियाय । पिण्यकीकृतदुर्वादिने । पित्रे । पीडाविनाशकाय ।
प्रीतिमते । पीतवसनाय । पीयूषाय । पीवराङ्गकाय । प्रियंवदाय ।
पीडिताघाय । पुलकाने । पुष्टिवर्धनाय नमः । ६४०

ॐ पुत्रवत्पाल्यभक्तौघाय नमः । पुण्यकीर्तये । पुरस्कृताय ।
पुष्टप्रियाय । पुण्ड्रधारिणे । पुरस्थाय । पुण्यवर्धनाय ।
पूर्णकामाय । पूर्वभाषिणे । पृथवे । पृथुकवर्धनाय ।
पृष्टप्रश्नपरीहर्त्रे । पृथिवीक्षेमकारकाय । पेशलाय ।
प्रेतभीतिघ्नाय । पेयपादोदकाय । प्रभवे । प्रेङ्खद्वाणीविलासाय ।
प्रेरकाय । प्रेमवर्धनाय नमः । ६६०

ॐ पैशुन्यरहिताय नमः । प्रोतसुखदाय । पोषकाग्रण्ये ।
प्रोतधर्मणे । पौरुषदाय । पूरकाय । पङ्क्तिपावनाय । पण्डिताय ।
पङ्कहाय । पम्पावासिने । पङ्गुत्ववारकाय । फलोदयकराय ।
भालदुरक्षरमदापहृते । फुल्लनेत्राय । फलिततपस्याय ।
फर्फरीकवाचे । फूत्कारोच्चाटितानेकतापत्रयपिशाचकाय ।
फाण्टानेकेतरासाध्यकार्याय । बलवते । बहुदात्रे नमः । ६८०

ॐ बदरीफललोलुपाय नमः । बालप्रियाय । ब्राह्मणाग्र्याय । बाधाहन्त्रे ।
बाहुदाय । बुद्धिदात्रे । बुधाय । बुद्धमतघातिने । बुधप्रियाय ।
वृन्दावनस्थतोयोन सर्वतीर्थफलप्रदाय । वैराग्योल्लासकर्त्रे ।
वृन्दावनसमाश्रयाय । बिल्वपत्रार्चनप्रीताय । बन्धुरोक्तये ।
बन्धघ्ने । बन्धवे । बधिरताहर्त्रे । बन्धुविद्वेषवारणाय ।
वन्ध्यापुत्रप्रदत्वाद्यैः यथायोगेन सृष्टिकृते । बहुप्रजापालकाय
नमः । ७००

ॐ वेतालादिलयप्रदाय नमः । भक्तानां जयसिद्ध्यर्थं
स्वयं वाद्यज्ञानप्रदाय । भगवद्भक्तविद्वेष्टुः सद्यः
प्रत्यक्षबन्धकृते । भक्तिदाय । भव्यदात्रे । भगन्दरनिवारणाय ।
भवसौख्यप्रदाय । भर्मपीठाय । भस्मीकृताशुभाय ।
भवभीतिहराय । भग्नदारिद्र्याय । भजनप्रियाय । भावज्ञाय ।
भास्करप्रख्याय । भामत्यागिने । भग्यदाय । भाव्यर्थसूचकाय ।
भार्यासक्तानामपि सौख्यदाय । भक्तभारधराय । भक्ताधाराय नमः । ७२०

ॐ सदा भोगप्रियाय नमः । भिक्षवे । भीमपदासक्ताय ।
भुक्तिमुक्तिफलप्रदाय । भूतप्रेतपिशाचादि भयपीडानिवारणाय ।
भूम्ने । भूतिप्रदाय । भूरिदात्रे । भूपतिवन्दिताय । भ्रूणकर्त्रे ।
भृत्यभर्त्रे । भक्तवश्याय । भेषजाय । भवरोगस्य भैरवाय ।
भोक्त्रे । भोजनदायकाय । भौरिकाय । भौतिकारिष्टहर्त्रे ।

भौमजदोषघ्ने । अरिमोदस्य भङ्गप्रदाय नमः । ७४०

ॐ भ्रान्तिहीनाय नमः । मल्लिकाकुसुमासक्ताय । मथितान्यमताय ।
महते । मसृणत्वचे । मरुत्प्रख्याय । महान्धनयनप्रदाय ।
महोदयाय । मन्युहीनाय । महावीरपदार्चकाय । मलीमसमलध्वंसिने ।
शास्त्रसंविदां मुकुराय । महिषीक्षेत्रगाय (महीक्षेत्रगाय) ।
मध्वमतदुग्धाब्धिचन्द्रमसे । मनःप्रमोदजननाय । मत्तानां
मदभञ्जनाय । महायशसे । महात्यागिने । महाभोगिने । महामनसे नमः । ७६०

ॐ मारिकाभयहर्त्रे नमः । मात्सर्यरहितान्तराय । मायाहर्त्रे ।
मानदात्रे । मात्रे । मार्गप्रदर्शकाय । मार्गणेष्टप्रदात्रे ।
मालतीकुसुमप्रियाय । मुख्याय । मुख्यगुरवे । मुख्यपालकाय ।
मितभाषणाय । मीलतारये । मुमूर्षवे । मूकानां दिव्यवाक्प्रदाय ।
मूर्धाभिषिक्ताय । मूढत्वहारिणे । मूर्छनरोगघ्ने ।
मृषावचनहीनाय । मृत्युहर्त्रे नमः । ७८०

ॐ मृदुक्रमाय नमः । मृदङ्गवादनरुचये । मृग्याय ।
मृष्टान्नदायकाय । मृत्तिकासेवनेनैव सर्वरोगनिवारणाय । मेधाविने ।
मेहरोगघ्नाय । मेध्यरूपाय । मेदुराय । मेघगम्भीरनिनदाय ।
मैथिलीवल्लभार्चकाय । मोदकृते । मोदकासक्ताय । मोहघ्ने ।
मोक्षदायकाय । मौनव्रतप्रियाय । मौनिने । मन्त्रालयकृतालयाय ।

माङ्गल्यबीजमहिम्ने । मण्डिताय नमः । ८००

ॐ मङ्गलप्रदाय नमः । यष्टिधारिणे । यमासक्ताय ।

याचकामरभूरुहाय । यातयामपरित्यागिने । याप्यत्यागिने ।

यतीश्वराय । युक्तिमते । यक्षभीतिघ्नाय । योगिने । यन्त्रे ।

यन्त्रविदे । यौक्तिकाय । योग्यफलदाय । योषित्सङ्गविवर्जिताय ।

योगीन्द्रतीर्थवन्द्याङ्घ्रये । यानाद्यैश्वर्यभोगवते । रसिकाग्रेसराय ।

रम्याय । राष्ट्रक्षेमविधायकाय नमः । ८२०

ॐ राजाधिराजाय नमः । रक्षोघ्नाय । रागद्वेषविवर्जिताय ।

राजराजायिताय । राघवेन्द्रतीर्थाय । रिक्तप्रियाय । रीतिमते ।

रुक्मदाय । रूक्षवर्जिताय । रेवास्नायिने । रैक्वखण्डव्याख्यात्रे ।

रोमहर्षणाय । रोगघ्ने । रौरवाघघ्नाय । रन्त्रे । रक्षणतत्पराय ।

लक्ष्मणाय । लाभदाय । लिप्तगन्धाय । लीलायतित्वधृते नमः । ८४०

ॐ लुप्तारिगर्वाय नमः । लूनाघमूलाय । लेखर्षभायिताय । लोकप्रियाय ।

लौल्यहीनाय । लङ्कारातिपदार्चकाय । व्यतीपातादि दोषघ्नाय ।

व्यवहारजयप्रदाय । वाचम्यमाय । वर्धमानाय । विवेकिने । वित्तदाय ।

विभवे । व्यङ्गस्वङ्गप्रदाय । व्याघ्रभयघ्ने । वज्रभीतिहृते ।

वक्त्रे । वदान्याय । विनयिने । वमिघ्ने नमः । ८६०

ॐ व्याधिहारकाय नमः । विनीताय । विदिताशेषाय । विपत्तिपरिहारकाय ।

विशारदाय । व्यसनघ्ने । विप्रलापविवर्जिताय । विषघ्नाय ।

विस्मयकराय । विनुताङ्घ्रये । विकल्पहृदे । विनेत्रे ।

विक्रमश्लाघ्याय । विलासिने । विमलाशयाय । वितण्डावर्जिताय ।

व्याप्ताय । व्रीहिदाय । वीतकल्मषाय । व्यष्टिदाय नमः । ८८०

ॐ वृष्टिदाय नमः । वृत्तिदात्रे । वेदान्तपारगाय । वैद्याय ।

वैभवदात्रे । वैतालिकवरस्तुताय । वैकुण्ठभजनासक्ताय । वोढ्रे ।

वंशाभिवृद्धिकृते । वञ्चनारहिताय । वन्ध्यावत्सदाय ।

वरदाग्रण्ये । शरणाय । शमसम्पन्नाय । शर्करामधुभाषणाय ।

शरीरक्षेमकारिणे । शक्तिमते । शशिसुन्दराय । शापानुग्रहशक्ताय ।

शास्त्रे नमः । ९००

ॐ शास्त्रविशारदाय नमः । शान्ताय । शिरःशूलहर्त्रे । शिवाय ।

शिखरिणीप्रियाय । शिवदाय । शिशिराय । श्लाघ्याय । श्रद्धालवे ।

श्रीप्रदायकाय । शीघ्रप्रसादाय । शीतघ्नाय । शुद्धिकृते ।

शुभवर्धनाय । श्रुतवते । शून्यघ्ने । शूराय । श्रेष्ठाय ।

शुश्रूषिसौख्यदाय । श्वेतवस्त्रप्रियाय नमः । ९२०

ॐ शैलवासिने नमः । शैवप्रभञ्जनाय । शोकहर्त्रे ।

शोभनाङ्गाय । शौर्यौदार्यगुणान्विताय । श्लेष्महर्त्रे । शङ्कराय ।

शृङ्खलाबन्धमोचकाय । शृङ्गारप्रीतिजनकाय । शङ्काहारिणे ।

शंसिताय । षण्ढपुंस्त्वप्रदाय । षोढ्रे । षड्वैरिरहिताय ।

षोडशमाङ्गल्यप्रदात्रे । षट्प्रयोगविदे । सत्यसन्धाय ।

समाधिस्थाय । सरलाय । सत्तमाय नमः । ९४०

ॐ सुखिने नमः । समर्थाय । सज्जनाय । साधवे ।

साधीयते । सम्प्रदायदाय । सात्त्विकाय । साहसिने । स्वामिने ।

सार्वभौमत्वसारविदे (सार्वभौमाय, सारविदे) । सर्वावगुणहीनाय ।

सदाचारानुमोदकाय । सर्वभूतदयाशालिने । सत्यधर्मरताय । समाय ।

स्वनामकीर्तनाद्वेदशास्त्रार्थज्ञानसिद्धिदाय । स्वनमस्कारमात्रेण

सर्वकाम्यार्थसिद्धिदाय । स्वभक्तानां दुराचारसहसनाय ।

सुस्मिताननाय । सर्वतन्त्रस्वतन्त्राय नमः । ९६०

ॐ सुधीन्द्रकरकञ्जजाय नमः । सिद्धिदाय । सिद्धसङ्कल्पाय ।

सिद्धार्थाय । सिद्धिसाधनाय । स्वप्नवक्त्रे । स्वादुवृत्तये ।

स्वस्तिदात्रे । सभाजयिने । सीमावते । सुरभये । सूनुदात्रे ।

सूनृतभाषणाय । सुग्रीवाय । सुमनसे । स्निग्धाय । सूचकाय ।

सेवकेष्टदाय । सेतवे । स्थैर्यचराय (स्वैरचराय) नमः । ९८०

ॐ सौम्यसौम्याय नमः । सौभाग्यदायकाय । सोमभासे । सम्मताय ।

सन्धिकर्त्रे । संसारसौख्यदाय । सङ्ख्यावते । सङ्गरहिताय ।

सङ्ग्रहिणे । सन्ततिप्रदाय । स्मृतिमात्रेण सन्तुष्टाय ।

सर्वविद्याविशारदाय । सुकुलाय । सुकुमाराङ्गाय । सिंहसंहननाय ।

हरिसेवापराय । हारमण्डिताय । हठवर्जिताय । हिताय । हुताग्नये नमः । १०००

ॐ हेतवे नमः । हेमदाय । हैमपीठगाय । हृदयालवे । हर्षमाणाय ।

होत्रे । हंसाय । हेयघ्ने । ललिताय । लब्धनिर्वाणाय । लक्ष्म्यै ।

लावण्यलक्षिताय । क्षमाशीलाय । क्षामहराय । क्षितिस्थाय ।

क्षीणपातकाय । क्षुद्रबाधापहर्त्रे । क्षेत्रज्ञाय । क्षेमदाय । क्षमाय नमः । १०२०

ॐ क्षोदहन्त्रे नमः । क्षौद्रदृष्टये । भक्तकृतागसां क्षन्त्रे ।

भौम्यं कृष्णावधूतोक्तं गुरोर्नामसहस्रकम् ।

कार्णादिक्या गिरा हयवदनेन प्रकाशितम् ॥

इति सोन्दूर श्रीकृष्ण अवधूतविरचिता श्रीराघवेन्द्रसहस्रनामावलिः सम्पूर्णा ।

श्रीकृष्णार्पणमस्तु ।